E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.004

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# ।। कोऽयं न्यायवैशेषिकोपज्ञो मोक्षः।।

—दुर्गानाथ भारद्वाजः
(बी.३४/१४०A३ख् गायत्रीनगर, शुकुलपुरा,
वाराणसी-२२१०१०)

**शोधसारः**

सुखप्राप्तये दुःखनिवृत्तये च प्राणिमात्रस्य नैसर्गिकी प्रवृत्तिरवलोक्यते। त्रिविधेषु अतीतवर्तमानानागतेषु अनागतदुःखस्य हेयतां शास्त्रकृतः प्रतिपादयन्ति हेयोपायं च विनिश्चयन्ति। अनागतदुःखस्य या अनुत्पत्तिः सैव अनागतदुःखनिवृत्तिशब्देन अभिहिता भवति। मोक्षस्य स्वरूपं श्रुतौ कीदृशम्? मोक्षस्य उपायः कः श्रुतिप्रोक्तः? न्यायवैशेषिकदर्शनयोः समानतन्त्रयोः तयोः कीदृशं तात्पर्यं पर्यालोच्य मोक्षस्य स्वरूपं तदुपायं वा चिन्वन्ति सम्बद्धा आचार्या इति सम्यग् विचारितं शोधालेखेऽस्मिन्।

**कूटशब्दाः**

एकवृन्तगतफलद्वयन्यायः। हेयं दुःखमनागतम्। ऊर्ध्वज्वलनम्, तिर्यग्गमनम्, अधोगमनम्। अभयम्, अमृतत्वम्, प्रविवेकवन्ध्यहृदयः, विमर्शः, पूर्णस्वातन्त्र्यम्, अशरीरता, उच्छेदः, सर्वात्मैक्यदृष्टिः, प्रतिभासः। आरम्भवादिनः अशेषविशेषगुणोच्छेदः। प्रतितन्त्रसिद्धान्तः। प्रामाण्यम्, साक्षात्कारः, दुःखम्, जन्म, प्रवृत्तिः, दोषः मिथ्याज्ञानम्, तत्त्व-ज्ञानम्।

लोके दृश्यते प्राणिनां प्रवृत्तिः सुखावाप्तये दुःखनिवृत्तये च नैसर्गिकी। तत्र सुखप्राप्तये या प्रवृत्तिः तस्या बलवत्त्वम् उताहो दुःखनिवृत्तये या प्रवृत्तिस्तस्या बलवत्त्वम्? इति जिज्ञासायाम् यत्र तावद् एकवृन्तगत-फलद्वयन्यायेन एकप्रयत्नेनैव सुखप्राप्तिः दुःखनिवृत्तिश्च साध्या भवेत् तत्र कश्चन नालक्षितो भवति विशेषः। भिन्नप्रयत्नेन चेद् निवृत्तिप्राप्त्योः साध्यता तदा विचक्षणानां प्राथम्येन दुःखनिवृत्तये प्रवृत्त्यनन्तरमेव तु सुखप्राप्तये प्रवृत्तिरिति सुखसाधनप्रवृत्तेरपेक्षया दुःखनिवृत्तये या प्रवृत्तिः तस्या बलवत्त्वं निश्चीयते। तदनुगुणमेव दुःखनिवृत्तिस्वरूप- प्रयोजनस्य सुखस्वरूपप्रयोजनापेक्षया ज्यायस्त्वं शक्यते निश्चेतुम्।

सेयं दुःखनिवृत्तिर्द्विविधा— १. वर्तमानदुःखस्य निवृत्तिः २. भाविदुःखस्य निवृत्तिश्च। प्रथमस्य वर्तमानदुःखस्य भुज्यमानतया निवृत्तिरशक्येति भाविनः अनागतस्य दुःखस्य निवृत्तिरेव सविशेषं साध्या विलसति।

यथोक्तम्— 'हेयं दुःखमनागतम्' इति[1]

अत्र जिज्ञासा समुदेति अनागतस्य अनुत्पन्नतया अस्तित्वं नास्तीति तन्निवृत्तिः कथं सम्भवेदिति। तत्रायं समाधिः- निवृत्तिर्द्वेधा सम्भवति। १. अनागतस्य दुःखस्य कारणं यद् विद्यमानं तत्र या कार्योत्पादनशक्तिः, तस्याः प्रतिबन्धकसमवधानेन समुच्छेदः।

२. साधनान्तरेण वा तस्याः शक्तेः समुच्छेदः। द्वयोरनयोः अन्यतरेणापि समुच्छेदेन अनागतदुःखस्य उत्पत्तिर्न भवेदिति दुःखस्य या अनुत्पत्तिः, सैव अनागतदुःखनिवृत्तिरभिधीयते। सर्वेश्वरे सर्वनियन्तारि भगवति निरतिशयं सुखमप्यस्ति तद्वद् दुःखनिवृत्तिरपि विद्यते निरतिशया। ईदृशम् ईश्वरं विना को वा नियन्ता भवेद् येन अग्नेरूर्ध्वज्वलनम् , वायोस्तिर्यग् गमनम्, जलस्य अधस्ताद् गमनम् - इत्येवं जगति व्यवस्था उपपत्तिमञ्चेत्?

निरतिशयं सुखं यथा सुखस्य पराकाष्ठा तथा दुःखनिवृत्तिश्च निरतिशया पराकाष्ठा दुःखनिवृत्तेर्बोध्या। ईश्वरे विद्यमानाम् इमाम् अवस्थाद्वयीं सम्प्राप्तस्य जीवस्य मोक्षापवर्गनिर्वाणापरपर्यायां मुक्तिं सम्प्राप्तां प्राह भगवती श्रुतिः। तद्यथा 'सोऽश्नुते सर्वान् कामान्' इति[२] , 'अथ सोऽभयं गतो भवति' इति[३] , 'अमृतत्त्वं च गच्छति' इति[४] , 'न स भूयोऽभिजायते' इति[५] ।

तदत्र सुस्पष्टमाभाति- 'सर्वान् कामान् अश्नुते' इत्यनेन निरतिशयसुखस्थितिः ईश्वरे, अवाप्तमोक्षदशे जीवे च समा। जन्मभयम् मरणभयं च तदितर-सर्वदुःखापेक्षया अधिकं भवति। भयं नाम भाविदुःखानुसन्धानजन्यः, चित्तवैक्लव्यकरः चित्तवृत्तिविशेषः। मोक्षावस्थायां किल 'सोऽमृतत्वाय कल्पते न स भूयोऽभिजायते' इत्यनेन श्रुतिवाक्यजातेन जन्ममरणाभावः अथच सोऽभयमित्यादिना निरतिशयदुखनिवृत्तिः स्फुटं प्रतिपादिता भवति।

अत्रेदमवधेयम् उपर्युक्ता मोक्षावस्था ईदृशी भवतीति निश्चयात्मकं ज्ञानं यस्य जायते स लक्षेष्वेकः मुमुक्षुः संजायते न तु बहुसंख्यकः। यथोक्तम्—

ये तावत् प्रविवेकवन्ध्यहृदयास्तेभ्यः प्रणामो वरं केऽप्येन्ये प्रविविञ्चते न च गताः पारं धिगेताञ् जडान्।

यस्त्वन्यः प्रविमर्शसारपदवीसम्भावनासु स्थितो लक्षैकोऽपि स कश्चिदेव सफलीकुर्वीत यत्नं मम।। इति[६]

ईश्वरः स्वतन्त्रः, तदधीनस्य जगतः व्यवस्था तेनैवैकेन नियन्त्रिता प्रचलति। यदि द्वयोः बहूनां वा पूर्णं स्वातन्त्र्यं भवेत् तदा जगति नियन्त्रिता व्यवस्था न सुस्था प्रचलेत्। ततश्च मुक्तानां जनानाम् ईश्वरवद् नैवेष्टं पूर्णं स्वातन्त्र्यम् पूर्णस्वातन्त्र्यालाभे निरतिशयसुखावाप्तेराशा कुतः? कुतो वा निरतिशयदुःखनिवृत्तिः? पारतन्त्र्यस्यैव दुःखबीजत्वाभ्युपगमात्।

न च शरीरसम्बन्धं विना शब्दस्पर्शादिसम्बन्धं वा विना सुखोदयः। तदेवं मोक्षावस्थायामपि शरीरसम्बन्धवद् शब्दस्पर्शादिसम्बन्धस्यापि अस्तित्वं सुखोत्पादार्थम् अवश्यं स्वीकार्यमापतेत्।

परं विचार्यताम्, मोक्षः पुरुषार्थः परमः इत्यत्र श्रुतिशरणा वयम्। सा च श्रुतिः मोक्षावस्थायां शरीरस्पर्शं सुतरां प्रतिषेधति। तद्यथा 'अशरीरं वावसन्तं न प्रिया-प्रिये स्पृशतः।' इति[७]

ततश्च मुक्तात्मानो जडाः स्वीकर्तव्याः। मोक्षावस्था-प्राप्तेः प्राग् जीवानां चेतनरूपता मोक्षावस्थायान्तु जडरूपता। चैतन्यं नाम ज्ञानम् अतः चेतना इत्युच्यतां ज्ञानिन इति वा प्रोच्यतां नार्थान्तरम्। ज्ञानस्य · चैतन्यस्य सत्त्वादेव बद्धा जीवाः सुखदुःखभागिनो भवन्ति। यतश्चाभिमतो ज्ञानगुणस्योच्छेदः मोक्षावस्थायां, ततो न तत्र लेशतोऽपि दुःखं सुखं वा। तदेवं मोक्षावस्थायाम् आत्यन्तिकी दुःखनिवृत्तिरेव सम्भवति न पुनः निरतिशय- सुखावाप्तिरिति धिया नैयायिकैः वैशेषिकैश्च आत्यन्तिकी दुःखनिवृत्तिरेव मोक्ष इत्यङ्गीक्रियते। परं विचार्यताम्, श्रुतिस्तु 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येद्' इति[८] सर्वात्मैक्यदृष्टिं वदति। जडानां दृष्टिर्नास्ति चेत् सर्वात्मैक्यदृष्टिः कुतः स्यात्। तत एव तु चेतनकारणतासिद्धान्त एव श्रुतौ प्रतिपाद्यो विषयः। मोक्षो नाम सर्वात्मैक्यदृष्टेः पराकाष्ठा, यत्र द्रष्टुः द्रष्टृत्वेन प्रतिभासाभावो जायते,

दृश्यस्य दृश्यत्वेन च प्रतिभासो न जायते अत: दृष्टि: चैतन्यम् स्वरूपेण विद्यमानापि दृष्टिशब्दव्यपदेश्या न भवति। तत एव तार्किका: आत्मन: स्वाभाविकम् अभोत्तृत्वं मन्वाना: मोक्षावस्थायां केवलाम् आत्यन्तिकीम् दु:खनिवृत्तिमेव सिद्धान्तयन्ति। एते हि- ''आत्मा जडश्चैतन्यं तु तस्य गुण इति वदन्ति सुचिन्त्योक्तिमर्मज्ञा:। जगत: सृष्टौ किं कारणमिति जिज्ञासायां नैयायिका: वैशेषिकाश्च आरम्भवादिनो भवन्ति। पृथिवी-जल-तेजो-वायूनां परमाणवो नित्या:, तैरेव आरभ्यन्ते द्वयणुकादि-पृथिवीपर्यन्त-प्रभृतीनि कार्याणि आद्यावयविप्रभृतीनि अन्त्यावयविपर्यन्तानि।

मोक्षस्वरूपविषये दार्शनिकानां मतभेदो दृश्यते। वैशेषिका: अशेषविशेषगुणोच्छेदो मोक्ष इति स्वीकुर्वन्ति। नैयायिकास्तु आत्यन्तिकी दु:खनिवृन्तिर्मोक्ष इति सिद्धान्तयन्ति। नैयायिकैकदेशिन: मोक्षे दु:खनिवृत्तिम् अथ च सुखसत्त्वं स्वीकुर्वन्ति। इति अन्यदेतत्।

समे प्राणिन: स्वस्य सद्गतिसमवाप्तये यथाशक्ति कायेन वाचा मनसेन्द्रियैर्वा प्रयतन्ते स्वभावत:। सद्गतिरियं न्यूनाधिक-तरतमभावेन नानाविधा। एतस्या: सद्गते: पराकाष्ठा एव मोक्षपदार्थ:। सर्वेषां दार्शनिकानां 'तत्त्वज्ञानान्मोक्ष: इत्यत्र ऐकमत्यम्। मोक्षश्चायं बन्धस्य प्रतिद्वन्द्वी। बन्धो नाम चेतनस्य अचेतनेन सह सम्बन्ध:। अचेतनं वस्तु भूतभौतिकम् अपरिमितं यद्यपि तथापि शरीरकृत एव तदितरेण सह (शरीर द्वारा) चेतनस्य सम्बन्धो जायते। शरीरेण चेतनस्य य: सम्बन्ध: स चेन्नष्टो नष्टप्रायो वा भवेत् तदा शरीरेतरेण सह चेतनसम्बन्धोऽपि नष्टो नष्टप्रायो वा भवेदेव।

तदत्रायं निष्कर्ष:-चेतनस्य जीवस्य अचेतनेन शरीरेण सह सम्बन्धो बन्ध इत्युच्यते। चेतनस्य शरीरेण सह सम्बन्ध: अनादि:। प्रवाहरूपेण विद्यमानस्य अस्य सम्बन्धस्य य: परिरक्षिता सर्वस्य तत्त्वस्य तत्त्वभूत: परमात्मा तस्य ज्ञाने सत्येव चेतनाचेतनयो: सम्बन्धस्य दूरीकरणोपायो ज्ञातुं शक्यते नान्यथा।

वैशेषिकैः दृङ्मात्ररूपं चैतन्यम् आत्मस्वरूपम् अनुमानमात्र-गम्यं स्वीक्रयते चेद् नैयायिकैः शब्दप्रमाणेनापि आत्मस्वरूपम् अवगम्यं भवतीति स्वीक्रियते।

वैशेषिकदर्शनेन समानं तन्त्रम् न्यायदर्शनम्। उभयत्र पदार्थानां तत्त्वज्ञानान्मोक्ष इति सिद्धान्तो विद्यते। पञ्चाध्यायात्मनि न्यायशास्त्रे प्रथमसूत्रेण षोडशपदार्थानां तत्त्वज्ञानाद् मोक्षो भवतीति प्रतिपाद्यते। तद्यथा- 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम:।' इति[९] तत्र प्रथमम् उद्दिष्टस्य प्रमाणस्य किं लक्षणमिति जिज्ञासायां प्रोक्तम् 'साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम्' इति। प्रमा किंस्वरूपा? इति जिज्ञासायामुच्यते- 'यथार्थानुभव: प्रमा।' इति[१०] तस्या: साधनं कारणम् इन्द्रियषट्कम्। तस्या: प्रमाया आश्रयस्तु आत्मा। यथोक्तम् 'ज्ञानाधिकरणम् आत्मा।' इति।[११] तदुभयम् अपेक्ष्य भिन्नं यन्न भवति तथाभूतं सद् यत् प्रमया व्याप्तं तत् प्रमाणम् इत्युच्यते। प्रमाया: करणं प्रमया नित्यसम्बद्धं भवति, करणस्य फलवत्त्वनियमात्। तच्च प्रमाणमित्यत्र न कस्यचिद् दार्शनिकस्य काचिद् विमति:। प्रमाया आश्रय: परमेश्वरो हि प्रमया नित्यसम्बद्धो राजते। जीवस्तु न सर्वस्तथाविध:, अस्मादृशानां भ्रमसम्भवात्। अत: जीवव्यावृत्तये प्रमाणलक्षणे 'प्रमाव्याप्तम्' इति पदमुपादीयते। तदुक्तं सर्वदर्शनसंग्रहकृता— 'एवंच प्रतितन्त्रसिद्धान्तसिद्धं परमेश्वरप्रामाण्यं संगृहीतं भवति।' इति[१२] । सूत्रकृता प्रतितन्त्रसिद्धान्तस्य किं लक्षणमिति जिज्ञासायां प्रोक्तम्—'समानतन्त्रसिद्ध: परतन्त्रासिद्ध: प्रतितन्त्रसिद्धान्त:।' इति[१३]

अस्ति हि परमेश्वरप्रामाण्यं समाने वैशेषिकतन्त्रे सिद्धं, परतन्त्रे मीमांसादौ असिद्धमिति तस्य प्रतितन्त्र- सिद्धान्तसिद्धता विलसति। अतश्च सूत्रकारो मुखतो ब्रूते-मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यम् आप्तप्रामाण्याद्' इति[१४]

न्यायाचार्या उदयनाचार्या अप्याहु:—

''मिति: सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता।

तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते॥'' इति[१५]

''साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ

भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः।

लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः

शङ्केन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः॥'' इति[१६]

तदेवं क्रमेण न्यायदर्शने प्रमाणादिषोडशपदार्थानां स्वरूपं पञ्चसु अध्यायेषु वितत्य प्रतिपादितम्। तेषां पदार्थानां तत्त्वज्ञानादेव निःश्रेयसपदवाच्यो मोक्षो लभ्यते जिज्ञासुना इति प्रथमसूत्रार्थः। तद् एतत् कणाददर्शने संमतमेव।

के धर्मिणः, ते च कतिविधाः? अथ के धर्माः, ते च कियन्तः? इति विविच्य द्रव्यगुणकर्मादयः सप्तैव पदार्थाः। अथ द्रव्यादिस्वरूपं किम्? के च तदीया गुणाः— इत्येवं विशेषमुद्दिश्य प्रवृत्तस्य कणाददर्शनस्य वैशेषिकदर्शनम् इत्यपरं नाम प्रथते।

प्रतिकूलवेदनीयस्य दुःखस्य जिहासितत्वम् सर्वसम्मतम् दुःखहानोपायश्च परमेश्वरसाक्षात्कार एवेति 'श्रौताः तमेवविदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।' इति[१७] श्रुतेः।

तदनुगुणा प्रविमृश्यतामियं सूक्तिः—

'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।

तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति॥' इति[१८]

परमेश्वरसाक्षात्कारस्य श्रवणादिभिर्भाव्यताम्, अथ मननस्यानुमितिरूपताम् ईश्वरोपास्तिम् प्राह श्रीमान् न्यायाचार्य उदयनाचार्यः। तद्यथा—

'न्यायाचर्चेयमीशस्य मननव्यपदेशभाक्।

उपासनैव क्रियते श्रवणानन्तरागता॥' इति[१९]

तत्र द्रव्यादीनां षण्णां भावपदार्थानां तत्त्वज्ञानाद् अभावस्वरूपः निःश्रेयससंज्ञः परमपुरुषार्थो दुःखात्यन्तोच्छेदापरपर्यायः प्राप्यते।

दुःखम्, दुःखहेतुः, मोक्षः, मोक्षोपायश्चेति चतसृभिः विधाभिः विभक्तं प्रमेयं श्रीगुरोर्मार्गदर्शने भावयतः मुमुक्षोः तत्त्वज्ञानं जायते। तत्त्वज्ञानाद् मिथ्याज्ञानमपैति मिथ्याज्ञानापाये दोषा अपयान्ति। दोषापाये प्रवृत्तिरपैति। प्रवृत्त्यपाये जन्मापैति। जन्मापाये दुःखमत्यन्तं निवर्तते। सेयम् आत्यन्तिकी दुःखनिवृत्तिरेव अपवर्ग इत्युच्यते। अथ किमिदं निवृत्तेः आत्यन्तिकत्वम्? इति जिज्ञासायामुक्तम्- 'यस्यां दुःखनिवृत्तौ निवर्त्यं यद् दुःखं, तत्सजातीयं दुःखान्तरं पुनः उत्पत्स्यते इत्येवं सम्भावनापि नास्ति, तादृशी दुःख-निवृत्तिः अपवर्गः इति। यथोक्तम्—

'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः।' इति[२०]

तदेवम् श्रुत्या अनुमानेन च पदार्थान्तराद् विविच्य स्तुत्यस्वरूपस्य परमेश्वरस्य जीवैरुपास्यस्य तत्त्वज्ञानाद् अभावात्मा आत्यन्तिकी दुःखनिवृत्तिर्मोक्षः परमपुरुषार्थो लभ्यत इति प्रतितन्त्रसिद्धान्तो जयति न्यायवैशेषिकयोरिति शम्॥

**सन्दर्भः—**

1. एतत् पातञ्जलं सूत्रम्।
2. तैत्तिरीयो० २/१/१
3. तदेव २/७/१
4. कठो० ६/८
5. अ०दि०-३८
6. श्रीमद् अभिनववचनमेतत्।
7. छान्दोग्यो०- ८/१२/१
8. बृहदा० २/४/४
9. गौतमसूत्रम् - १/१/१
10. बुद्धिगुणप्रभेदोऽयम्
11. तर्कसंग्रहः, प्रत्यक्षखण्डः
12. अक्षपाददर्शनम् - पृ० २३५
13. गौतमसूत्रम् - १/१/२९
14. तदेव २/१/६७
15. न्यायकुसुमाञ्जलिः ४/५
16. न्यायकुसुमाञ्जलिः ४/६
17. श्वेताश्व० ३/८
18. उद्धृतम्- सर्वदर्शन-संग्रहः, पृ०- २१०
19. न्यायकुसुमाञ्जलिः १/१३
20. न्यायसूत्रम् - १/१/२

**सहायकग्रंथसूची**


1. तैत्तिरीयोपनिषद्। शिक्षावल्ली सहित। वेदान्त ग्रंथमाला नं. १२। चौखम्बा वेदान्त प्रकाशन, वाराणसी।

2. पतंजलिः। योगसूत्रम्। दर्शन ग्रंथमाला नं. १८। चौखम्बा संस्कृत संस्थान, वाराणसी।

3. कठोपनिषद्। वेदान्त ग्रंथमाला नं. ९। चौखम्बा वेदान्त प्रकाशन, वाराणसी।

4. अभिनवगुप्तः। ईश्वरप्रत्यभिज्ञाविमर्शिनी। काश्मीर शैव ग्रंथमाला नं. ३। चौखम्बा संस्कृत संस्थान, वाराणसी।

5. छान्दोग्य उपनिषद्। तत्त्वविवेचनी हिंदी व्याख्यासहित। चौखम्बा सुरभारती प्रकाशन, वाराणसी।

6. बृहदारण्यकोपनिषद्। संस्कृत मूल। चौखम्बा संस्कृत श्रृंखला कार्यालय, वाराणसी।

7. अक्षपादगौतमः। न्यायसूत्रम्। दर्शन ग्रंथमाला नं. १०। चौखम्बा संस्कृत संस्थान, वाराणसी।

8. अन्नम्भट्टः। तर्कभाषा। दर्शन ग्रंथमाला नं. १६। चौखम्बा संस्कृत संस्थान, वाराणसी।

9. अन्नम्भट्टः। तर्कसङ्ग्रहः। दर्शन ग्रंथमाला नं. १५। चौखम्बा संस्कृत संस्थान, वाराणसी।

10. माधवः। अक्षपाददर्शनम् सर्वदर्शनसङ्ग्रहः। दर्शन ग्रंथमाला नं. ४२। चौखम्बा संस्कृत संस्थान, वाराणसी।

11. अन्नम्भट्टः। न्यायकुसुमाञ्जलिः। दर्शन ग्रंथमाला नं. २८। चौखम्बा संस्कृत संस्थान, वाराणसी।

12. श्वेताश्वतरोपनिषद्। वेदान्त ग्रंथमाला नं. १५। चौखम्बा वेदान्त प्रकाशन, वाराणसी।

13. परात्रींशिकाविवरणी। काश्मीर शैव ग्रंथमाला नं. ५। चौखम्बा संस्कृत संस्थान, वाराणसी।

14. Dasgupta, S.N. - A History of Indian Philosophy, Cambridge University Press, London, 1963

15. Deussen, Paul - The Philosophy of Upnishads, (Tr.) A.S. Geden, T&T Clark, Edinburg, 1908

16. Ranade, R.D. - A Constructive Survey of Upnishdic Philosophy, Oriental Book Agency, Poona, 1926

17. The Kusumanjali। Udayana Acharya। Haridas Bhattacharya टीका सहित। संपादक एवं अनुवादक: E.B. Cowell। Baptist Mission Press, कलकत्ता। १८६४।

18. The Nyayasutras। Gautam। Vatsyayana भाष्य सहित। Nayayavarttika एवं Tatparyatika अंश। संपादक: Gangadhar Sastri Tailanga। E.J. Lazarus Co., बनारस। १८९६। विज्ञानग्राम संस्कृत श्रृंखला खंड ९।